# दुर्गा स्तुतिः

नमस्ते सिद्धसेनानि आर्ये मन्दरवासिनि
कुमारि कालि कापालि कपिले कृष्णपिङ्गले

भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते
चण्डिचण्डे नमस्तुभ्यं तारिणि वरवर्णिनि

कात्यायनि महाभागे करालि विजये जये
शिखिपिच्छध्वजधरे नानाभरणभूषिते

अट्टशूलप्रहरणे खड्गखेटकधारिणि
गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे

महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि
अट्टहासे कोकमुखे  नमस्तेऽस्तु रणप्रिये

उमे शाकम्भरि श्वेते कृष्णे कैटभनाशिनि
हिरण्याक्षि विरूपाक्षि  सुधूम्राक्षि नमोऽस्तु ते

वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसि
जम्बूकटकचैत्येषु नित्यं सन्निहितालये

त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती
सावित्री वेदमाता च तथा वेदान्त उच्यते

स्तुतासि त्वं महादेवी विशुद्धेनान्तरात्मना
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे

कान्तारभयदुर्गेषु भक्तानां चालयेषु च
नित्यं वससि पाताले युद्धे जयसि दानवान्

त्वं जम्भनी मोहिनी च माया ह्रीः श्रीस्तथैव च
संध्या प्रभावती चैव सावित्री जननी तथा

तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्यविवर्धिनी
भूतिर्भूतिमतां सङ्ख्ये वीक्ष्यसे सिद्धचारणैः

*Mahabharat, Bhishma Parva, 23.4-16.*
*Recited by Arjuna, just as the battle at Kurukshetra was about to commence.*

*One who recites this hymn in the morning upon rising will never know fear from Yakshas, Rakshasas, nor Pishachas. He will have no enemies, nor fear from snakes, animals with fangs, nor even from a royal family. He will be victorious in all disputes, and if bound he will be freed from his bonds. He is sure to cross over all difficulties, and will be freed from thieves. He will ever be victorious in battle and will certainly obtain Lakshmi. He will have health and strength, and will live for a hundred years. (Mahabharat, Bhishma Parva 23.21-25)*